देवभूमि-सौरभम्
Devabhūmisaurabham
Vol 2 Issue 1 July-Dec 2024 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# पण्डितराजजगन्नाथमते अभिधाशक्तिः

**डा. शैलेन्द्रनारायणकोटियालः**
प्राध्यापकः, साहित्यविद्याशाखा
श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः
9412949976

------------------------------------------------------------

**मुख्यशब्दाः-**

अभिधा, शक्तिः, सम्बन्धः, प्रतियोगी, अनुयोगी,

**पत्रसारः-**

काव्यशास्त्रस्येतिहासे विशिष्टं स्थानं प्राप्तवतः जगन्नाथस्य अभिधास्वरूपनिरूपणमपि विशिष्टमेव वर्तते । **शक्त्याख्योऽर्थस्य शब्दगतः, शब्दस्यार्थगतो वा सम्बन्धविशेषोऽभिधा** इति अभिधास्वरूपं निरूप्य वैयाकरणानां, मीमांसकानां नैयायिकानां च अभिधाविषयकमतानि प्रस्तुतवान् । अप्पय्यदीक्षितप्रतिपादितं **शक्त्या प्रतिपादकत्वमभिधा** इत्येतन्निरस्तुं तत्र उपपत्तिविरोधं दर्शितवान्-

अभिधालक्षणोक्तं प्रतिपादकत्वं नाम प्रतिपत्तेः (ज्ञानस्य) हेतुत्वमिति यदुच्यते तत्तु अभिधायकशब्दगतं स्यात् । प्रतिपत्तौ कारणं भवति अभिधाज्ञानम्, न तु प्रतिपादकत्वज्ञानम् । 'अस्मिन् शब्दे प्रतिपादकत्वमस्ती'त्याकारकज्ञानमात्रेण अर्थप्रतिपत्तिर्नैव जायते। अतः प्रतिपादकत्वम-भिधेत्येतन्न सङ्गच्छते । तथापि तद्यद्यङ्गीक्रियते तर्हि उभयोरप्येकत्वसिद्धेः, प्रतिपत्तौ प्रतिपादकत्वस्य कारणत्वं वाऽङ्गीकरणीयम्, अभिधाया कारणत्वं वा निराकरणीयं भवति इति।

एवं जगन्नाथेन सप्रमाणं स्वमतस्य उपादेयता प्रतिष्ठापिता ।

## शोधपत्रम्

काव्यशास्त्रस्येतिहासे पण्डितराजजगन्नाथस्य स्थानं विशिष्टमस्ति । न्यायशैल्या विषयप्रतिपादनम्, पूर्वपक्षमुपस्थाप्य युक्तियुक्तं तस्य खण्डनम्, तदनन्तरं स्वमतोपस्थापनमित्येते विषयाः अत्यन्तं व्यवस्थिततया तेन निबद्धाः सन्ति रसगङ्गाधरे ।

शब्दार्थयोः वाच्यवाचकभावे वर्तमाना शब्दशक्तिरभिधा च बहुभिरालङ्कारिकैः प्रतिपादिता । तत्रापि विमतयः सन्त्येव । जगन्नाथः रसगङ्गाधरे अभिधामूलध्वनिं सोदाहरणं निरूप्य, तदनन्तरं 'घटकज्ञानं विना घटितज्ञानं न भवती'ति हेतोः अभिधामूलध्वनिसञ्ज्ञायां घटकीभूताया अभिधाया स्वरूपं निरूपयितुमुपक्रम्य वदति यत्-'अथ केयमभिधा नाम यन्मूलः प्रथमं निरूपितोऽयं ध्वनिप्रपञ्चः' इति । अभिधास्वरूपं तेन,

**शक्त्याख्योऽर्थस्य शब्दगतः, शब्दस्यार्थगतो वा सम्बन्धविशेषोऽभिधा**[1]

इति प्रतिपादितमस्ति । अर्थस्य शब्देन सह वर्तमानः, शब्दस्य अर्थेन सह वर्तमानो वा सम्बन्धविशेषः अर्थात् बोध्यबोधकभावरूपोऽभिधा। शक्तिरितिशब्दोऽभिधायाः पर्यायत्वेनोपयुज्यते। अत एव जगन्नाथेन **'शक्त्याख्यः'** इत्युक्तम्।

सा च कश्चन सम्बन्धविशेषः। परस्परं शब्दस्य शक्योऽर्थः, अर्थस्य च शक्तं पदमिति परस्परं शक्तिव्यवहारात् सम्बन्धस्य द्विष्टप्रायत्वाच्च, स सम्बन्धविशेषः द्विधा उच्यते-

(१) अर्थप्रतियोगिकः शब्दानुयोगिकः,

(२) शब्दप्रतियोगिकोऽर्थानुयोगिकश्चेति।

तयोर्मध्ये कतरोऽभिधापदार्थ इत्यत्र विनिगमनाविरहादुभयविधोऽपि अभिधापदार्थतयाऽभिमतो विद्वद्भिः। एवम् अर्थं शब्देन शब्दमर्थेन च सम्बध्नन् रशनाविशेषोऽभिधेति कथ्यते।

एवम् अभिधाया स्वरूपं निरूप्य जगन्नाथः केषाञ्चन शास्त्रकाराणाम् अभिधालक्षणं प्रस्तौति -

**(१) सा च पदार्थान्तरमिति केचित्**[2]**।**

अभिधा पदार्थान्तरम्=परिमितद्रव्यादिपदार्थेऽभ्यो भिन्ना इति, पदस्यार्थः पदार्थः, स चेश्वरेच्छारूपाद्भिन्नः बोध्य-बोधकभावरूपः, बोधकतारूपः, बोध्यतारूपः शब्दार्थयोः तादात्म्यरूपो वा इति केचित् (मीमांसकाः वैयाकरणाश्च) वदन्ति। नैयायिकैरङ्गीकृतामभिधाया ईश्वरेच्छारूपतां विरुद्ध्य एते तामभिधां बोध्य-बोधकभावरूपाम्, बोधकतारूपां, बोध्यतारूपां, शब्दार्थयोः तादात्म्यरूपां वा आमनन्ति। इदानीं मीमांसकानां वैयाकरणानाञ्च मतं किञ्चिदवलोकयामः।

**मीमांसकाः**-द्रव्यगुणादिसप्तपदार्थातिरिक्तः शक्तिरूपपदार्थो वर्तते। यथाऽग्नौ दाहकशक्तिस्तथा शब्देऽर्थबोधकशक्तिरस्ति। वह्नौ वर्तमाना दाहानुकूला शक्तिः न वह्नितद्गुणादिरूपा। यतो हि वह्न्यादीनां समवधानेऽपि प्रतिबन्धकसत्त्वे दाहो नोत्पद्यते। तथैवार्थप्रकाशिका शब्दनिष्ठा शक्तिः न शब्दस्वरूपा शब्दज्ञानेऽप्यर्थबोधानुदयात्। नाप्यर्थस्वरूपा अर्थस्य सर्वदा प्रकाशापत्तेः। अतोऽतिरिक्तैव।

**वैयाकरणाः**-पदस्यार्थः पदार्थः। घट एव शब्दः, घट एवार्थ इत्यादिषु अभिधायक-अभिधेययोः सामानाधिकरण्यनिर्देशेन शब्दार्थयोर्वर्तमानस्ता-दात्म्यसम्बन्ध एवाभिधा इति केचन एव वैयाकरणा वदन्ति न तु सर्वे। तस्य तादात्म्यस्य वस्तुत्वे अग्निशब्दोच्चारणानन्तरं दाहाद्यापत्तेः, आध्यासिकं तादात्म्यं सम्बन्धः, तस्यैव नामान्तरं वाच्यवाचकभाव इति ब्रुवते। ये वैयाकरणाः तादात्म्यं नाङ्गीकुर्वन्ति तेऽपि वाच्य-वाचकभावं सम्बन्धं वर्णयन्ति। (पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः वाच्यवाचकभावापरपर्याया। तद्ग्राहकञ्च इतरेतराध्यास-पूर्वकतादात्म्यम्।[3])

वैयाकरणानां मीमांसकानाञ्च मतमकेनैव वाक्येन प्रस्तुतं जगन्नाथेन। अत्र केचिच्छब्देनानयोर्मतेऽरुचिर्दर्शिता। तद्बीजं तु पद-पदार्थयोः वाच्यवाचकरूपापरपर्यायरूपः सम्बन्धः नैयायिकानां समवाय इव पदार्थान्तरं भवत्वित्युच्यते चेत् तादृशसमवाय इव सम्बन्धत्वेनैव तत्सिद्धिर्भवेत्, न तु वह्निनिष्ठदाहकशक्तिरिव तस्य विलक्षणत्वम्।

**(२) 'अस्माच्छब्दादयमर्थोऽवगन्तव्य' इत्याकारेश्वरेच्छैवाभिधा। तस्याश्च विषयतया सर्वत्र सत्त्वात् पटादीनामपि घटादिपदवाच्यता स्यात्। अतो व्यक्तिविशेषोपधानेन घटादिपदाभिधात्वं वाच्यम्' इत्यपरे।** (नैयायिकाः)

---

[1] रसगङ्गाधरः-द्वितीयाननम्

[2] पदार्थान्तरम्=द्रव्य-गुण-कर्म-सामान्य-विशेष-समवाय-अभावातिरिक्तः अष्टमः पदार्थः।

[3] वैयाकरणसिद्धान्तलघुमञ्जूषा

एतेषां मते ईश्वरेच्छा-

(१) अस्मात् पदादयमर्थो बोद्धव्य इत्याकारिका शब्दप्रकारिका अर्थविशेष्यिका।

(२) इदं पदममुमर्थं बोधयत्वित्याकारिका अर्थप्रकारिका शब्दविशेष्यिका च भवति।

**प्रश्नः-**ईश्वरेच्छा सर्वविषयिणी भवति खलु? अतः विषयतासम्बन्धेन सर्वेषामपि तत्र विषयत्वं भवत्येव। तेन घटपटादीनां सर्वेषामपि तत्र विषयत्वात् घटपदेन घट एव बोध्यते इति कथं वा वक्तुं शक्यम्? घटपदात् पटोऽपि बोध्येत खलु?

**उत्तरम्-**अत एव व्यक्तिविशेषोपधानेन घटादिपदाभिधात्वं वाच्यम्। घटजन्यबोधविषयतावान् घटो भवतु, पटपदबोधविषयतावान् पटो भवत्वित्यादिरीत्या घटादिरूपं व्यक्तिविशेषमुपाधीकृत्य ईश्वरेच्छायाः घटादिपदाभिधात्वमुच्यते चेत् घटपदेन पटबोधासम्भवान्नातिप्रसङ्गः।

**प्रश्नः-**एवं यदि घटोपहितत्वेन पटोपहितत्वेनेत्यादिरीत्या ईश्वरेच्छाऽङ्गीक्रियते तर्हि तस्या नानात्वम् अङ्गीकरणीयं भवति
।

**उत्तरम्-**न तथा। ईश्वरेच्छा एकैव। किन्तु घट-पटाद्युपहितत्वेन, अर्थात् घटोपहिता ईश्वरेच्छा घटमात्रे, पटोपहिता ईश्वरेच्छा पटमात्रे इत्युपाधिभेदेन सा भिन्ना।

**(३) 'एवमपीश्वरज्ञानादिना विनिगमनाविरहः स्यात्, अतः प्रथममतमेव न्यायः' इत्यपि वदन्ति।**

ईश्वरस्य ज्ञानेच्छाकृतयः नित्या एकत्वविशिष्टाश्च। तर्ह्यभिधा ईश्वरेच्छारूपैव कुतः? ईश्वरज्ञानरूपा ईश्वरकृति(प्रयत्न)रूपा वा कुतो न? अस्मिन् विषये विनिगमको नास्तीत्यत ईश्वरेच्छारूपाया अभिधाया-स्तदीयज्ञानकृत्योरतिप्रसक्तत्वात् पदार्थान्तरमेवाभिधेति प्रथममतमेव साधु इति केषाञ्चन मतम्।

एवं मीमांसकानां वैयाकरणानां नैयायिकानाञ्च मतानि निरूप्य जगन्नाथः अप्पय्यदीक्षितोक्तम् अभिधालक्षणं खण्डयति-

**यत्तु वृत्तिवार्तिके 'शक्त्या प्रतिपादकत्वमभिधा' इत्यप्पय्यदीक्षितैरुक्तम् तत्तुच्छम्, उपपत्तिविरोधात्। तथा हि- इह शब्दाज्जायमानायामर्थोपस्थितौ कारणीभूतं यदीयज्ञानं सा शब्दवृत्तिरभिधाख्या लक्ष्यतया प्रस्तुता। प्रतिपादकत्वस्य च प्रतिपत्तिहेतुत्वरूपस्य शब्दगतस्य न ज्ञानं प्रतिपत्तौ कारणम्। अतः कथं नाम प्रतिपादकत्वमभिधेत्युच्यते?**

अभिधालक्षणोक्तं प्रतिपादकत्वं नाम प्रतिपत्तेः (ज्ञानस्य) हेतुत्वमिति यदुच्यते तत्तु अभिधायकशब्दगतं स्यात्। प्रतिपत्तौ कारणं भवति अभिधाज्ञानम्, न तु प्रतिपादकत्वज्ञानम्। 'अस्मिन् शब्दे प्रतिपादकत्वमस्ती'त्याकारकज्ञानमात्रेण अर्थप्रतिपत्तिर्नैव जायते।

अतः प्रतिपादकत्वमभिधेत्येतन्न सङ्गच्छते। तथापि तद्यद्यङ्गीक्रियते तर्हि उभयोरप्येकत्वसिद्धेः, प्रतिपत्तौ प्रतिपादकत्वस्य कारणत्वं वाऽङ्गीकरणीयम्, अभिधाया कारणत्वं वा निराकरणीयं भवति।

**अथ प्रतिपादकत्वं प्रतिपत्त्यनुकूलव्यापाररूपं ज्ञानं सदेवोपयुज्यते प्रतिपत्तावित्युच्यते एवमपि शक्त्येत्यनेन शब्दगतार्थगता वा काचिच्छक्तिः प्रतिपत्तिहेतुतया विवक्षिता, सैवाभिधेति 'अभिधया प्रतिपादकत्वमभिधा' इति लक्षणं पर्यवसन्नम्। तथा च स्फुटैवासङ्गतिरात्माश्रयश्च। न चाभिधातः शक्तिरतिरिक्ता शब्दजन्यप्रतिपत्तिप्रयोजिका काचिदस्तीत्यत्र प्रमाणमस्ति [4]।**

---

[4] रसगङ्गाधरः-द्वितीयाननम्

**असङ्गतिः**-अभिन्नवस्तुनोर्भेदेन प्रतिपादनात् । शब्दजन्यबोधप्रयोजिका शक्तिरभिधैव । तदतिरिक्ता कापि शक्तिर्नाङ्गीकृता विद्वद्भिः। यदि तादृशी शक्तिः काचिदस्ति तर्ह्येव तादृशशक्त्या प्रतिपादकत्वमभिधेति सङ्गच्छते स्म । किन्तु नास्तीति हेतोरसङ्गतिः ।

**आत्माश्रयः**-लक्ष्यज्ञानस्य लक्षणवाक्यार्थज्ञानाधीनतया, अभिधाज्ञानेऽभिधाज्ञानापेक्षणा-दात्माश्रयः। प्रतिपादकत्वस्य प्रतिपत्तिहेतुत्वरूपार्थकरणे जायमानं पूर्वोक्तदोषं निवारयितुं, प्रतिपादकत्वस्यार्थः 'प्रतिपत्त्यनुकूलव्यापारः, स च व्यापारो ज्ञात एवाभिधेयार्थबोध उपयुक्तो भवती'ति (ज्ञातैवाभिधा कारणमिति) यद्युच्यते, तर्ह्यपि शक्त्या प्रतिपादकत्वमभिधेत्येतत् आत्माश्रयदोषविमुक्तं न भवति। शक्तिर्हि अभिधाख्यैवेति पूर्वं ज्ञातम्। ततः (अभिधातिरिक्तशक्तेरनङ्गीकारात्) अभिधया प्रति-पादकत्वमभिधेति लक्षणं स्वज्ञाने स्वज्ञानापेक्षणात् आत्माश्रयदोषेण दुष्टमिति हेतोः नोपादेयत्वं भजते।

सन्दर्भग्रन्थः


१. रसगङ्गाधरः (द्वितीयाननम्) –
२. वैयाकरणसिद्धान्तलघुमञ्जूषा-